# सङ्कोचरूपी अन्धकारः



लेखनम् - डॉ. श्रीश कुमार तिवारी

चित्राङ्कनम् - हरिकृष्ण (एलियास) मनोज

**कथाः कथयन्ति.....!**

कथाः जीवनेन सम्बद्धानाम् अम्लमिष्टानुभवानां जीवनयापनस्य मनोबलस्य तथा तादृशानां विषयाणां सन्दर्भे सहजतया सूचनाः प्रयच्छन्ति, यासाम् अभिज्ञानं बोधश्च अत्यन्तमावश्यकं वर्तते। अङ्ककीयं जगत्,नारीणां विषये विमर्शः, अथवा प्रकृतेः संरक्षणं भवतु, अथवा आजीविकायाः साधनानि, जीवनस्य आह्वानानां प्रत्यक्षीकरणं समाधानं मतदानस्य अधिकारो वा भवतु – एते सर्वेऽपि विषयाः उत्कृष्टतया जीवनयापने सहायतां कुर्वन्ति। 'महत्त्वपूर्णानां जीवनकौशलानां' विभिन्नान् विषयान् उद्दिश्य लिखितानां कथानां पठनानन्देन सहैव अवबोधात्मकस्य, तार्किकस्य, विश्लेषणात्मकस्य तथा च उचित-निर्णयस्य कौशलद्वाराणि अपि उद्घाटयन्ति। पठ्यताम्, अवगम्यताम्, अभिवर्ध्यताम् !

**कार्यक्रम-समन्वयिका:** प्रो. उषा शर्मा, आचार्या एवं प्रभारिणी, राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

**लेखनम्:** डॉ. श्रीश कुमार तिवारी

**अनुवादः** विष्णु प्रसाद उपाध्याय

**चित्राङ्कनम्:** हरिकृष्ण (एलियास) मनोज

**मुद्रणकला:** डॉ. ऋषिका शर्मा, सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

**प्रारूप-निर्माणम्:** मोहम्मद नाज़िम

**समीक्षा-समितिः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली:** लक्ष्मीनरसिंहन्, कार्याधिकारी; डॉ. मनमोहन शर्मा, वरिष्ठशोधाध्येता; प्रदीप पौडेल, वरिष्ठशोधाध्येता; गानमूर्ति, वरिष्ठशोधाध्येता

**मार्गदर्शनम्:** प्रो. नीना सबनानी, एनिमेटर एवं सहायक-संकायः, डिज़ाइन-विभागः, भारतीय-प्रौद्योगिकी-संस्थानम्, हैदराबादम्**;** चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली**;** प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

**कृतज्ञता-ज्ञापनम्**

अक्षय कुमार दीक्षित, मेंटर, शिक्षा-निदेशालयः, प्रशासनम्, देहली

श्याम सिंह सुशील, लेखकः

**आईआईटी हैदराबादम्:** डॉ. प्रसाद एस. ओंकार, विभाग-प्रमुखः एवं उपाचार्यः, डिज़ाइन विभागः; प्रो. दीपक जॉन मैथ्यू, आचार्यः, डिज़ाइन-विभागः; डेलविन जूड रेमेडियोज़, सहायकाचार्यः, डिज़ाइन-विभागः; अंकिता रॉय, सहायकाचार्या, डिज़ाइन-विभागः; डॉ. मोहम्मद शाहिद, सहायकाचार्यः, डिज़ाइन-विभागः; डॉ. सौरव देवरी, सहायकाचार्यः, डिज़ाइन-विभागः; डॉ. शुहिता भट्टाचार्जी, सहायकाचार्या, उदार-कला-विभागः

गौतम गोस्वामी, सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

मोहम्मद शाह आलम, वरिष्ठः परामर्शदाता (आईसीटी), राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, एनसीईआरटी, नवदेहली

भावना खेड़ा, जेपीएफ, राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, एनसीईआरटी, नवदेहली

उल्लास
ULLAS
जन जन साक्षर
नव भारत साक्षरता कार्यक्रम

# सड्कोचरूपी अन्धकार:


**लेखनम्**
डॉ. श्रीश कुमार तिवारी

**चित्राङ्कनम्**
हरिकृष्ण (एलियास) मनोज



राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING


रितिशा समाजकल्याणविभागे उपप्रबन्धकत्वेन कार्यं करोति स्म ।
सामाजिकविभागेन सह सम्बन्धकारणेन सरलव्यवहारेण च समाजे तस्याः बहुसम्माननं ख्यातिश्च आसीत् ।


मोहन ! अस्माभिः विपणिः गन्तव्या।
आम्, महोदये !


विपणिः
BAZAAR
रितिशा सम्पूर्णमार्गे मौनम् आसीत् ।
सा चिन्तिता आसीत् ।


न ज्ञायते सा किमर्थं चिन्तिता आसीत् ।
महोदये ! अत्यन्तम् आवश्यकी दूरभाषा आगता ।
यदि भवत्याः अनुमतिः अस्ति, तर्हि यानम् उचितस्थले स्थगयित्वा वार्तां कुर्याम् ?
आम्, करोतु


क्षम्यताम्, आरक्षककार्यालयात् दूरभाषा आसीत्। अतः मार्गे एव यानं स्थगितवान्।
आरक्षकस्य दूरभाषा ?
किम् अभूत् ? कापि समस्या अस्ति वा ?
न महोदये। परन्तु यदि समये एव अवधानं न अदास्यम्, तर्हि समस्या अभविष्यत्।


किम् अभूत् ?
महोदये ! भवती जानाति एव राखीपुत्र्याः S.S.C. इत्यस्य प्रशिक्षणं कारयन् अस्मि।
तत्र सा कस्मैचित् दूरभाषासंख्यां दत्तवती स्यात्, अथवा किमपि अन्यत् कारणं स्यात् ?
परन्तु कतिपयेभ्यः दिनेभ्यः निरन्तरम् अज्ञातदूरभाषा आगच्छति।


तदनन्तरं भवान् किं कृतवान् ? किं भवान् ज्ञातवान् यत् कः दूरभाषां करोति स्म !
न ज्ञातम् । पृष्टे सति राखी अपि किमपि वक्तुं न शक्तवती ।
एवं वा ! तदा भवता किं कृतम् ?
अहं तु यद्यपि तां सङ्ख्याम् अवरुद्धवान्, तथापि अन्यसंख्यया दूरभाषा आगन्तुम् आरब्धा ।
तदनन्तरं किं जातम् ?
किम्, राखी अधुनापि प्रशिक्षणकेन्द्रं गच्छति ?


आम्, महोदये ! गच्छत्येव, वयं किमर्थं तस्याः प्रशिक्षणम् अवरुन्ध्याम ।
एवं करणेन अज्ञातदूरभाषाकर्तॄणाम् उत्साहः वर्धेत ।
याभ्यः संख्याभ्यः अज्ञातदूरभाषाः आगच्छन्ति स्म । तासां सर्वासां विवरणदानपूर्वकं समीपस्थारक्षकालयं गत्वा प्राथमिकसूचनापञ्जीयनं कारितवान् ।


सम्पूर्णविवरणस्य परीक्षणं कृत्वा एतादृशकार्यकर्तृभ्यः दण्डं प्रदास्यामः इति आरक्षकजनाः आश्वासनं दत्तवन्तः ।


भवान् आरक्षकालयं गन्तुं भयम् अथवा सङ्कोचं न अनुभूतवान् ?
भयम् अथवा सङ्कोचः ? कस्मात् ? आरक्षकात् ? न महोदये ! ते तु अस्माकं सेवायै सुरक्षायै च सन्ति खलु !
अस्माकं सङ्कोचः अनुचितकार्यकर्तॄन् इतोऽपि प्रोत्साहयति यत् ते अस्मान् इतोऽपि पीडयेयुः ।



रितिशायाः प्रश्नाः समाप्ताः आसन् ।
मोहन ! यानं सिविललाइन्सस्थानं प्रति आवर्तयतु ।
सिविललाइन्स् किमर्थं महोदये ?
गृहं तु अपरस्यां दिशि अस्ति ।
सिविललाइन्स्-आरक्षकालयः गन्तव्यः अस्ति ।
आरक्षकालयः ! किमर्थं महोदये ?
किम् अभूत् ?


मयापि प्राथमिकसूचनापञ्जीयनं करणीयमस्ति।
महोदये ! कस्मिन् विषये ?
विगतात् एकमासात् मम कृते अपि अज्ञातदूरभाषाः आयान्ति।
अपि च मम सामाजिकसञ्जालेऽपि अनुचितसन्देशाः आगच्छन्ति।


भवतः साहसेन मम सङ्कोचः अपगतः।
धन्यवादः मोहन!
भवती अपि ।

महत्वपूर्णजीवनकोकौसले आश्रिता

# कथा श्रृंखला









































राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING